# २७ सप्तविंश दशकः - शताक्ष्यवतारः

दैत्यः पुरा कश्चन दुर्गमाख्यः प्रसादिता त्पद्मभवात्तपोभिः ।
अवैदिकं वैदिक मप्यगृह्णान्मन्त्रं समस्तं दिविषज्जयैषी ॥ २७-१॥

वेदे गृहीते दितिजेन विप्राः श्रुति स्थिरा विस्मृत वेदमन्त्राः ।
सान्ध्यानि कर्माण्यपि नैव चक्रुः क्षितिस्त्ववेदा ध्ययना बभूव ॥ २७-२॥

हृतेषु मन्त्रेष्वखिलेषु पूजा यज्ञादि भूमौ न कृतं मनुष्यैः ।
सुरा अशक्ता स्तदलाभ खिन्ना दैत्येन युद्धे बलिना जिताश्च ॥ २७-३॥

त्यक्त्वा दिवं ते गिरि गह्वरेषु निलीय वर्षाणि बहूनि निन्युः ।
वृष्टे रभावाद्धरणी च शुष्क-जलाशया तर्ष निपीडिताऽभूत् ॥ २७-४॥

सर्वे तृषार्ताश्च हिमाद्रि मेत्य त्वां ध्यान पूजा नुतिभि र्भजन्तः ।
प्रसादयामासु रनेककोटि ब्रह्माण्ड कर्त्री मखिलार्ति हन्त्रीम् ॥ २७-५॥

दृष्ट्वा दयार्द्राक्षि शता त्वमेभिः कृपाश्रुवर्षै र्नवरात्र मुर्व्याम् ।
जलाशया न्पूर्णजलां श्चकर्थ जनाः शताक्षीत्यभिधां ददुस्ते ॥ २७-६॥

क्षुत्पीडितानां च चराचराणां सर्वत्र नानाविध मन्नमिष्टम् ।
स्वादूनि मूलानि फलानि चादाः शाकम्भरीति प्रथिता ततोऽभूः ॥ २७-७॥

दैत्यस्तु विज्ञाय समस्त मस्त्र शस्त्रैः ससैन्यः प्रहरन् वपुस्ते ।
रणाङ्गणे सायक विद्धगात्रः सशब्द मुर्व्यां तरुवत्पपात ॥ २७-८॥

स चासुरात्मा खलु वेदमन्त्रान् चिरं पठंस्त्वा मभिवीक्षमाणः ।
गतायु राविश्य परात्मनि त्वयि अवाप मुक्तिं मिषतां सुराणाम् ॥ २७-९॥

वेदान्हृता नब्ज भवानने त्वं पुनश्च निक्षिप्य जगत्सुरक्षाम् ।
कृत्वा नुता देवगणै र्नरैश्च तुष्टा तिरोऽभूः करुणार्द्रनेत्रा ॥ २७-१०॥

भक्तस्य वै दुर्गति नाशिनी त्वं सुखप्रदा दुर्गम हन्त्रि मातः ।
दुर्गेति नाम्ना विदिता च लोके विचित्ररूपा स्तव देवि लीलाः ॥ २७-११॥

कोऽप्यस्ति चित्ते मम दुर्गमोऽयं ज्ञातस्त्वया नैव मया तु देवि ।
यः सन्ततं द्रुह्यति मे तमाशु संहृत्य मां रक्ष नमो नमस्ते ॥ २७-१२॥

** मंगळ रूपिणि मदियनि शूलिनि मन्मद पाणियळे
संगडम् नींगिड चडुदियिल् वन्दिडुम् शङ्करी सौन्दरिये ।
कङ्गण पाणियन् कनिमुगम् कण्डनल् कर्पग कामिनिये
जॆय जॆय शङ्करि गौरि कृपाकरि दुःख निवारणि कामाक्षी ॥ **